No. ४३५६

Title मातृ भाषा प्रकाशिका.

Author श्री नारायण तीर्थः

Extent २४५ Age x

Subject पू- मीमांसा

८५ पत्राणि

भातृभाषाप्रकाशिका

पत्र ५७

4357
F. 545

४५ पत्र

(स्वस्तीत्यादिपदस्य वाच्यचयनीयानां)

द्वौ स्तः इति संज्ञकानामिष्टकानां बहुत्वात्तस्य स्वस्तिसमुदाये स्थित्याहोमनगुणायोगात्॥ प्राणभृत्त उपदधा-
तीत्यत्र तु प्राणभृत्संज्ञकानामिष्टकानां बहुत्वेपि छत्त्रिणो गच्छंतीतिवत्लिंगसमवायमात्रेण प्राणभृ-
द्प्राणभृत्समुदाये प्राणभृच्छब्दः सिद्धः स्थेयुर्वाक्यशेषात्॥ अक्ताः शर्करा उपदधातीत्यत्रांजनसाधनद्र-
व्यसंदेहे तेजो वै घृतमिति वाक्यशेषात्तेन नाक्ताः कर्तव्या इति निर्णयोपि द्रव्यस्तुतिप्रयोजनं अर्थवादाक-
ल्पनैकदेशत्वात् यत्र निर्णायकोर्थवादोपि नास्ति तत्र आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति
न्यायेन यथा प्रासादे भुंक्ते कांस्ये भुंक्ते इत्यत्र प्रासादे उपविश्य कांस्ये परिविष्टस्य भोज्यं प्रतीयते न तु विपरी-
तं एवं स्रुवेणावद्यतीति विधिः सामर्थ्याद्द्रवद्रव्यविषये स्वधितिनावद्यतीति मांसविषये हस्तेनावद्यतीति खड्गेन
चपुरोडाशविषये व्यवतिष्ठते॥ ॥ इति श्रीनीलकंठसूरिसूनुगोविंदविरचिते भाट्टभाषाप्रकाशे प्रथमोध्या-
यः॥ ॥ भावार्थाः कर्मशब्दा इति॥ विध्यर्थवादमंत्रनामधेयस्मृत्याचाराख्यानि धर्मे प्रमाणानि ष

मी०दू०भा०या०४ रूपनिरूपितं। इदानीं तत्स्वरूपभेदः शब्दांतराभ्याससंख्यासंज्ञागुणप्रकरणांतरैः षड्भिः प्रमाणैः प्रतिपाद्यते।
तस्य चोत्पत्तिचोदनावाक्यगतेभ्यः सर्वेभ्यः पदेभ्यः श्रुतिन। गौरवात् किंतु लाघवात् इतरविशेषविताद् एकस्मादे
वपदात्॥ तत्रापि क्रियापदादेव तस्य एव फलसिद्धौ प्रधानत्वात्। नत्वपपदात्। अन्यथा सोमेन यजेतेत्या
दोश्च तद्यथा पूर्वा[illegible] पूतीकादिः प्रतिनिधिर्न स्यात्॥ गुणे त्वन्याय्यकल्पनासंभवतिन प्रधानेऽतो धात्व
र्थो व धर्मोत्पत्तिः स च देवतोद्देशेन द्रव्यत्यागात्मको मानसक्रियात्वात् पश्चध्यामुतर विनाशीत थापि दर्शपू
र्णमासाभ्यां स्वर्गकामो यजेतेति श्रुतार्थापत्त्या यागावांतरव्यापाररूपमपूर्वं नाम कालांतरभोग्यफलप्र
तिरूपत्वेन कल्प्यते॥ भोक्ता च देहादन्यस्तत्सिद्धिस्त्रिः। अपूर्वाणि तु अमावास्यायोगिभ्य आग्नेयादिभ्यः पञ्चा
नेभ्यः त्रीणि प्रथममुत्पद्य पश्चात् समुदायापूर्वमारभन्ते॥ एवं पौर्णमासेऽप्यपूर्वत्रयादेकं समुदा
यापूर्वं ताभ्यां पुनः परमापूर्वं जन्यते। अंगापूर्वाणि तु तत्रैवोपकुर्वन्तीति। तत्रापि अवघातादी

राम

६

नां दृष्टार्थानां नियमांशे नैवापूर्वोत्पादकत्वं प्रोक्षणादीनां तु दृष्टार्थत्वाभावात् केवलमपूर्वार्थत्वमेवा ए
वं स्तोत्रशस्त्रयोरपि तत्र स्तोत्रे ऋक्षु वर्तते प्रउगं शंसतीति ऋक्संस्तवनस्यैव कर्तव्यतापत्तीते यजमानादिवत्तयो
देवतास्मरणादिदृष्टकार्यार्थत्वायोगात् ॥ प्रगीतमंत्रसाध्यं स्तवनं स्तोत्रं ॥ अप्रगीतमंत्रसाध्यं न देवशस्त्रं
एवं ब्राह्मणाख्यमेवाख्यातं प्रधानकर्म वा गुणकर्म वा विधानेनतु देवास्त्वपाभिर्यजते ददाति चेत्यादि मंत्रस्य ।
प्रयोगाणां नामंत्राणां प्रयोगबहिर्भूते विधावसामर्थ्यात् ॥ यत्राभियुक्तानां मंत्रोऽयमिति बुद्धिस्ते मंत्राः अत्र महर्षीणां ॥ प्र ५
तत्रापि ४ ऋषिप्रवरनामधेयानां न मंत्रत्वं प्रसिध्यभावादेव ॥ ऋग्यजुःसामानि प्रसिद्धान्येव ॥ पादबंधवती ऋक् ॥ अ
नियताक्ष[illegible]रपादं यजुः ॥ गीतिः सामेति ॥ प्रो
क्षणीरासादयेत्यादयो निगदाः पादबंधप्रगीतमंत्रत्वाभावेन ऋक्सामभ्रमसत्वात् यजुष्वेवान्तर्भव
न्ति ॥ यजुःप्रमाणं तु पादवसानाकांक्षमेकार्थं पदजातं तावदेव ॥ यथा स्योनं ते सदनं करोमि घृतस

समीचीनं

२

सुच्छुसेतुं योग्यं

धारयासुखेवंकल्पयामीतिसदनकरणार्थमेकंयजुः।तस्मिन्सीद अमृतेप्रतितिष्ठ व्रीहीणांमेधसुमनस्यमा
नइतिपुरोडाशासादनार्थमपरंयजुः अत्रध्यायमनुष्ठेदेउभयोरपिवाक्ययोरसंगतार्थत्वात्सीदेति निराकांक्षय
ते॥इयेवंत्वस्यादावाकांक्षानिवर्तकेपदद्वयंपि नास्तितथापिइयेवेति छिन्नत्वजेनेत्यनुमाष्टींतिविनियोग
वलान्मंत्रभेदच्छिन्नसीत्वाघ्राहारेणावाकायरणांच॥यातेअग्नेअयाशयातनूर्वर्षिष्ठागह्वरेष्ठोग्र
वचोअपावधीत्वेषंवचोअपावधीत्स्वाहेतिसंपूर्णार्थमंत्रमाम्नायमरूपते॥यातेरजाशयेति।याते
अग्नेहराशयेति।अनयोःसाकांक्षयोराकांक्षापूरणांतनूरित्यादिनाभवितुंयुक्तमितितदेवानुषंज
नीयं॥अप्रकृतकल्पनापेक्षयासन्निहितानुबंगस्यलघुत्वात॥चित्पतिस्त्वापुनातुवाक्पतिस्त्वापु
नातुसनयोर्निराकांक्षयोरपिदेवस्त्वासवितापुनात्वछिद्रेणपवित्रेणस्म्फतरस्मेत्रगतोवाकाश्यवाः
छिद्रेणत्स्यादिःयोगपत्तयासंवर्द्धमहेतीतितत्राप्यनुषंजनीयः॥असंबद्धपदस्यवधानेतुनानुषंग

माद्धुभाषा
२
तत्सु २
अग्ने५
राम

संते वायुर्वातेन गच्छतां सयज्ञैरंगानि संयजुःपतिराशिषे त्यादौ गच्छन्तामित्येकवचनस्यांगानीति ब
हुवचनेन संबंधानर्हत्वात्॥ तद्धवा याह्वाशिषे त्यत्राग्निनानुषंगः॥ हिध्यतीति॥ तदेवमुपोद्घातं तत्प्रस
क्तानुप्रसक्तं च समाप्य लक्षणार्थं भेदमुदाहरति॥ शब्दान्तरे कर्मभेदः कृतानुबंधत्वात्॥ यजति ददाति जु
होतीत्यादौ धात्वर्थभेदात्कर्मभेदः॥ सामिधीयजति तनूनपातं यजति इलो यजति बर्हिर्यजति स्वाहा
कारं यजतीत्यादौ एकस्यैवाभ्यासे स्यच्च पञ्चकृत्वोऽभ्यासादभ्यासात्कर्मभेदः॥ ननु सामिदादेर्गुणात्

सामिदादेः

नूनं स्यसमिधास्त्रज्ञाज्यस्य व्यक्तत्वाद्धविषं च लिंगप्राप्तत्वात्॥ अप्राप्तो हि गुणः पूर्वं चानिवेशमलभ
मानो नुत्पत्तिं न क्षिनत्ति ननु प्रप्रस्ततो यजति शब्दस्याभ्यासस्य एवात्र कर्मभेदकः॥ पूर्वोदाहृतानि पदानि ये पू
ष्टाकपाल इत्यादीनि समिध इत्यादीनि च वाक्यानि पठित्वाम्नायते य एवं विद्वानमावास्यां यजते
॥ य एवं विद्वान् पौर्णमासीं यजत इति॥ अत्र न कर्म विधीयते तत्स्वरूपसद्भावदेव तत्सामान्यात्॥ किं त

मा० द० भा०

हि अमावास्यापौर्णमासीशब्दाभ्यां तत्तत्कालविहितौ समुदायावनूद्येते॥ अनुवादप्रयोजनं तु अमावास्या-
याममावास्यया यजेत पौर्णमास्यां पौर्णमास्या दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादि॥ अत्र विधित्रयमुत्पत्तिवि-
धिः उत्पत्त्यधिकारविनियोगप्रयोगभेदात्॥ तत्र कर्मस्वरूपमात्रावगमको विधिरुत्पत्तिविधिः॥ यदाग्नेयोऽष्टाक-
पालस्त्यादि फलसंबंधबोधको विधिरधिकारविधिः॥ चित्रया यजेत पशुकामः सर्वेभ्यः कामेभ्यो दर्शपूर्ण-
मासौ सर्वेभ्यो ज्योतिष्टोम इत्यादि॥ व्रीहिभिर्यजेत यवैर्यजेत समिधो यजति तनूनपातं यजतीत्यादि अंगसंबंध-
बोधको विधिर्विनियोगविधिः॥ अत्र व्रीहियवादीनां दृष्टार्थानां विकल्पः॥ समित्तनूनपादादीनामदृ-
ष्टार्थानां समुच्चयः॥ यद्यपि विकल्पे अष्टदोषा आपद्यन्ते तथापि वाक्यद्वयस्य समबलत्वादन्यतरेणान्यतरबाधायो-
गाद्गत्याङ्गीक्रियते॥ ते च व्रीह्युपादाने व्रीहिशेषीकृतताप्रामाण्यत्यागः अशेषीकृतस्य प्रामाण्यस्य ग्र-
हणं वा शेषीकृतप्रामाण्यत्यागः अशेषीकृताप्रामाण्यग्रहः एवं यवोपादानेऽपि॥ सांगप्रधानानुष्ठा-

राम

पको विधिः प्रयोगविधिः स चव्क विकल्प्यते ॥ औपदेशिके ऽतिदेशिके चाङ्गे समवेत विचारपूर्वं प्रयोगं कुर्यादिति
॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिषु स्वर्गकामपदं सर्वं भवतीति प्रा
प्तस्य अवधुत्यानुवाद इति पक्षमाश्रित्य श्रोतः ॥ स पुनस्त्रिविधः ॥ अपूर्वो विधिर्नियमविधिः परिसंख्या
विधिश्च ॥ तत्र यो मानान्तरेणाप्राप्तस्यार्थस्य विधायकः सोऽपूर्वः ॥ यथा व्रीहीन्प्रोक्षतीति न ह्येतेन विना प्रोक्ष
णं व्रीहिषु कथंचिदपि प्राप्नोति ॥ लोकादृष्टो वा पक्ष प्राप्तस्याप्राप्तांशपूरणफलो द्वितीयः ॥ य
था व्रीहीनवहन्तीति ॥ यथा वा यवयरा व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवैरिष्ट्वा यवैरेव यजेत व्री
हिभ्य इति ॥ अवघाते तण्डुलनिष्पत्त्यात्मकपादवघातवन्नखविदलनस्यापि लोकावगतकारणत्वाविशेषान्न
प्राप्तेऽवघातप्राप्त्यंशोऽस्ति ॥ द्वितीये पूर्वोदाहृते व्रीहियववाक्ये व्रीहिप्रयोगादूर्ध्वमपि पक्षे यव
प्राप्त्या व्रीहिपक्षप्राप्तांशोऽस्ति ॥ तत्र रिररोचद्वारेण निवर्तितयाद्युक्तत्वात् व्रीहिभिरेवेत्येव कोऽनुवादः ॥ वेदतो

ग्रहणांगत्वं विधीयते

मादृभावाः

लोकतो वा समुच्छिन्नस्याप्रयोरित्तरनिवृत्तिफलको विधिस्तृतीयः ॥ यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधा
नीमादत्त इति ॥ पंचपंचनखा भक्ष्या इति अग्निचयने इष्टकानयनार्थमश्वरशना [illegible] ग्रहणांगत्वेन रशनाग्रहणं चेति द्वय
मनुष्ठेयं ॥ तत्रोभयत्रायं मन्त्रो रशनाग्रहणप्रकाशनसा[illegible]मर्थ्यरूपाल्लिंगादेव प्राप्त इति नार्दभ्यश्वरशनांगत्वं मन्त्रे प्र
तीयते ऽपि तु गर्दभरशनातो व्यावृत्तिरेवाग मादोषत्रयं सोढ्वा व्यंगीक्रियते विधिवैयर्थ्यपरिहाराय दोषत्रयं च ॥
श्रुतस्याश्वरशनाग्रहणांगत्वस्य त्यागः ॥ अश्रुतस्य गर्दभरशनांगत्ववर्जनस्य ग्रहणं ॥ मन्त्रलिंगात्सामान्
तः प्राप्तस्य गर्दभरशनांगत्वस्य [illegible] मान इति श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति सर्वत्र परिसंख्यायां
दोष[illegible]त्रयं ज्ञेयं ॥ एवं मन्त्रैर्विधिभिर्विहितं कर्म द्विविधं गुणकर्मार्थकर्मभेदात् ॥ तत्र यत्कर्मानुकारकमा
ग्निस विधीयते तदाद्यं ॥ उत्पत्त्याप्तिविकृतिसंस्कृतिरूपफलभेदाच्चतुर्विधं ॥ वसंते ब्राह्मणो ऽग्नीनादधीत यूपं त
क्षति ॥ अत्राधाने तक्षणादिसंस्काराभ्यां [illegible]युपयोः प्रागसतोरुत्पत्तिः फलं ॥ एवं यष्टानि सैयो नीत्यत्र सं

दू

राम

यवनस्य पिंडोत्पत्तिः॥ साम्नायो धेनव्यः गां दोग्धीत्यादावध्यापनदोहनाभ्यां सिद्धयोरेकस्मान्नायपयसोः ख्याप्तिः॥ सो
ममभिषुणोति व्रीहीनवहंति दक्षिणो ग्रावाऽऽज्यं विलापयतीत्यादौ कंडनादेः सोमादिषु वैरूप्यपरित्यागेन रूपांतरापत्ति
र्विकृतिः॥ चतुरो मुष्टीन्निर्वपति व्रीहीन्प्रोक्षतीत्यादौ निर्वापप्रोक्षणाभ्यां अदृष्टवीर्येषु व्रीहिषु अदृष्टरूपगुणा
धानं दोषापकर्षणं वा संस्कारः क्रियते तत्सफलं न तु योगफलसिद्धिः॥ दृष्टरूपोपि संस्कारः पुरोडाशानलंकु
रोति तंडुलानद्भिः प्रक्षालयतीत्यादिकं तु कारकमनाश्रित्य पद्भूयीयते तदर्थकर्म॥ तच्च द्विविधमन्यार्थम
गमनन्यार्थं प्रधानं च॥ अंगमपि [illegible] द्विविधं सन्निपत्योपकारकं आरादुपकारकं च तत्र यस्य धानेऽक्रतुरूपे स्व
रूपेणोपकारकं तदावघातव्रीह्यादि। यच्च फले पूर्वं उपकरोति तत्तद्द्वितीयं यथा प्रयाजादि॥ अनन्यार्थमपि द्विवि
धं प्रकृतिः सपंचाऽनयोर्यत्स्मान्विधौ सर्वाण्यंगानि विधीयंते तत्प्रथमं दर्शपूर्णमासज्योतिष्टोमादि॥ यदंग
विकलं विधीयते तद्द्वितीयं॥ सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः विश्वजिता यजेतेत्यादि॥ तत्र प्र

रूपं विकृतिः २

भा०दृ०भी०का०२

पि

या त-

यमे कथं भावस्यैतांशस्य संनिधौ पठितैरेवांगैर्भवति॥ द्वितीये तु प्रकृतिवद्विकृतिः कर्तव्येति कान्यतिदेशवाक्येने
ति विशेषः॥ अग्निहोत्रादीनि तु दर्विहोमाख्यानि प्रधानकर्माणि न तानि प्रकृतिर्विकृतिर्वा भवन्ति किंलक्ष॥ वाराषे
व॥ तान्यकर्माणि त्रिविधानि नित्यनैमित्तिककाम्यानि॥ यावज्जीवचोदनाचोदितं नित्यं॥ यावज्जीवमग्निहोत्रं
जुहुयात् यावज्जीवं दर्शपूर्णमासाभ्यां यजेत॥ वसंते वसंते ज्योतिषा यजेत॥ ज्योतिषा ज्योतिष्टोमेन॥ अहरहः संध्या
मुपासीत तान्नेतान् यज्ञानहरहः कुर्वीतेत्यादि॥ निमित्तानंतरं कर्तव्यं नैमित्तिकं॥ वैश्वानरं द्वादशकपालं नि
र्वपेत्पुत्रे जात इत्यादि॥ प्रायश्चित्तमप्येवं तत्र भवति॥ तच्च क्रतुमध्ये निमित्तं पुरुषमध्ये यनिमित्तं च॥ आद्यं अग्न
ये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेदि त्या
दि॥ यो ब्रह्मचारी अवकिरेत् स नैर्ऋतं गर्दभमालभेतेत्यादि द्वितीयमित्यलं प्रसक्तानुप्रसक्तोक्त्या॥ प्रकृतमनुसरा
मः॥ यथाप्रयवमिति विधुद्वाकिमपौर्णमासोपदेनाग्नेयादित्रिकस्यानुवादः सर्वं उपांशुयाजमंतरा यजेतेत्यु

द्विविधं

त्यम

अव्यवहितौ आग्नेयाग्नीषोमीयेत्या २

पांसुयाजपदेनाविष्णुरूपांशु[illegible]यष्टव्यो ऽजामित्वोद्विवाक्यविहितविष्ण्वादि[illegible]कस्यानुवादोस्त्विति नवकंभुक्ते॥
जामिवारणतया उक्तस्य किंयदेतत्पदं चैषां पुरोडाशाविष्णुप्रयुक्तां तजामित्वादोषपरिहारएकेनापिभवति जामिवाइत्यपि
त्वापेतिचर्ध्वयमारोपक्रमोपसंहारैकरूप्यावगतस्यैकवाक्यत्वस्य पागत्रयकल्पने याभंतुमयुत्वात्॥ननुद्र
व्यदेवतयागस्यस्वरूपमंतरा वाक्येनास्ति यष्टव्यवाक्येतुदेवतामात्रमप्य[illegible]स्तीति अत्रैवयागोत्पत्तिरिष्टे चेन्न॥स
वैसैवारणतद्यज्ञायग्रह्यतेयद्भूवायामान्यमिति द्धौवाजसलाभस्योभयत्रापितुल्यत्वात्।आग्नेयाग्नीषोमीययाज
नुवाक्यायुगलयोरंतरालेपठितत्वादनुवाक्याद्वयदेवतालाभइति नाकिंचिदृश्यं॥यष्टव्यवाक्यंतुस्तुतिमात्र
दृश्यमुपांशुयाजोपत्रविष्णुरिज्यतइति।तत्रविष्णुनाग्नीषोमौप्रजापतिश्च विकल्प्यंते।एवमन्यत्रापिक
र्मभेदार्थः।एवं पक्षस्तदभेदार्थः सिद्धांतइतिज्ञेयं॥तिस्रआहुतीर्जुहोतीत्यत्र कर्मगतत्वात्संख्यायाःस्व
रूपकर्मभेदइतिसप्तदशप्राजापत्यान्पशूनालभतइत्येवोदाहरणं॥प्रजापतिर्देवतायेषामितिविग्रहेसम

आसमावई

ज्या २ क्र ३ ति ४

६

त

भा० द्व० भा० वा० १२ दशपश्वद्रव्यकस्त्वेकोयागः॥ प्राजापत्यास्त्वत्र प्राजापत्याश्चेति द्वंद्वश्चतोऽङ्गीतां तानानामेकत्वेनैव प्रतिपशुं प्राजापत्य
त्वपर्यवसानोऽत्र प्रदशयागाः॥ प्रकृतौ तु एकपशुनिष्पन्ने कादशाङ्गानद्रव्ये यागस्य दृष्टत्वेन तामान्यादतिदेशादिहा त्वं २
पि प्राप्त्रेन प्रत्याख्यातुं शक्यं चेत्तत्तः स प्रदशैव यागाः फलं तु द्वव पक्षे स्त्वेकपशुनाशो सु गणानाम्ना सिद्धान्ते तन्मात्र
स्य नाश इति तस्यैव पुनरुत्पादनं नगणस्येति॥ प्रदानं तु देशकालकर्तैक्यात् सर्वेषां सहैव दाधिपशुसोरपि प्रकृतावे
वमेव॥ ज्योतिष्टोमं प्रकृत्य ज्योतिरयैव विश्वज्योतिरथैव सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यादौ न प्र
त्वैव सहस्रदक्षिणागुणविधिः ज्योतिरादिसंज्ञानिकर्मणः पदानामानर्थक्यापातात् संज्ञाक्रमाप्त्यर्थो नत्वेव गमे
न प्रकरणाविदाववस्थं भावाच्च ज्योतिरादिसंज्ञानि कर्मान्तराण्येवेतानि॥ सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति
वैश्वदेवयागे उत्पन्नौ आमिक्षया ऽवरुद्धे उत्पन्नमिष्टं वाजिनं निवेशमलभमानं ततो न्यद्वाजिदेवत्यं वाजिन
द्रव्यकं कर्मोपस्थापयतीति गुणात्कर्मभेदः॥ यत्र तु उत्पन्नो निर्गुणं कर्म श्रूयते पश्चाद नेके गुणा श्रूय

त प्रे पृथातिरद्यातय नीतिविधानादूधनी मूर्तो भागउ आमी
ज्ञोच्यते। द्रवीभूत न सुभागो वाजिनम्

राम

यं नेतत्र सर्वेषां गुणानां विकल्पेन निवेशो न तु कर्मभेदकत्वं ॥ यथाग्निहोत्रं जुहोतीत्यस्य दध्ना जुहोति पयसा जुहो
तीत्यादीनां अग्निहोत्रप्रकरणस्थः । यत्तु दध्नेन्द्रियकामस्य जुहुयादिति तत्र धात्वर्थस्य प्राप्तत्वात् गुणमात्रविधेय
[illegible]र्मे यं यन्न विधेयं तस्यैव फलं अतो न कर्मणि फलाय गुणो विधीयते न तु गुणः कर्म भिनत्तीति ॥ अग्निष्टुति
वारवंतीयमग्निष्टोमसाम कार्यमित्युत्पन्नाम्नायते ॥ एतस्यैव रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा कामो ह्येते
न यजेतेत्यत्र पूर्वस्मिन् कर्मणि रेवत्याधारवारवंतीयत्वं लक्षणो गुणः पशुफलाय विधातुं न शक्यते द
धिवदस्य प्रसिद्धत्वाभावात् ॥ ततश्च प्राप्तकर्मानुवादेन गुणस्वरूपतत्फलयोरुभयविधानमशक्यं वाक्यभेदात् ॥
तस्मात् रेवत्याश्रयकल्पितं रेवतीवारवंतीयसंबंधविशिष्टोऽपूर्वो यागः फलाय विधीयते ॥ एतस्येति षष्ठ्यं
तमपि प्रस्तूयमानगामि न तु पूर्वप्रकृतगामीत्यपि सिद्धं यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान् गृह्णी
यात् ॥ यद् बृहत्सामा शुक्राग्रानिति प्रकृते ज्योतिष्टोमे ग्रह[illegible]ग्रमात्रं विधीयते न तु ततोन्यत्कर्म रथंतरसामा

पूर्वस्मिन्नेते व३

त्वा पशु

य

दि१

भाद्दमायाः

द्दिकं विधिं शक्नुयपघातकयदि श्राद्धात्तत्स्वकरणात् दिक्षेदान्तं राजा राजसूयेन स्वाराज्यकामो यजेतेत्युत्र राजशब्दस्य
क्षत्रियवाचित्वात् । तन्मात्राधिकारिकायामपि राजसूयान्तर्गतायामवेष्टिसंज्ञायां ~~मवेष्टिसंज्ञा~~यामिष्टौ यदि ब्राह्म
णो यजेत वाहस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा नमभिघारयेदित्यादीनि वचनानि एतत्यान्नाद्यकामं याज
येदित्यन्नाद्यकामब्राह्मणादीनामप्यवेष्टिं प्रापयन्ति ॥ एवं वसंते ब्राह्मणोऽग्निमादधीत । ग्रीष्मे राजन्यः शरदि वै
श्यः ॥ वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमित्येतान्यपि वचनानि यथावर्तमाधानोपनय
नयोः प्रापकाणि ॥ कुण्डपायिनामयनाख्ये सत्रे उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहुति मासं दर्शपूर्णमासा
भ्यां यजन्ते इत्यत्रापि नैयमिकाग्निहोत्रादेः सत्रे उपस्थित्यसंभवात् ॥ शब्दमात्रेणोपस्थित्यस्तु यागमेपि प्राप्त
कर्मानुवादेन रूपसदानं तेर्यमासस्तु गुणास्य विधानुमशक्यो वाक्यभेदात् । न च प्राप्तेकर्मणि मासः संपादयितुं राम
शक्यं तेत्रानुपादेयत्वात्तस्य तस्मादनुपादेयगुणसंबंधानुरोधानोसंनिधिः कर्मभिन्नं ति । अनुपादेयगु

यावज्जीवकर्तव्यतया विहित = २

(कृतिसमवायघटितसंबंधेन प्रकृतभावनान्वयित्वे सति प्रकृतविधिप्रयुक्तविषयत्वमुद्देश्यत्वं तद्भिन्नत्वमुपादेयत्वं) १

उपसदोनाम इष्टिविशेषाः चरित्वा तत्प्रयोगं कृत्वा

तेजस्कामः अग्न्यर्थं
पशोश्च प्रयोजनं ॥ धा२ अग्निचिन्तयप्रयोगः किंतु गुणफलवद्दर्शपूर्णमासप्रयोगो तेन बाधितः
भिन्नतां गुणमन्तरेण स्यादपृथक्प्रयोगः २

वैधातव्या इष्टिविशेषस्तस्या अग्न्यादीनां ... तत्कार्यं यजमानसंस्कारलक्षणं तथा च वैधातवी ... कार्यकारित्वम् २

संकल्पस्य अत्र वे४ तत्संकल्पस्य तदकरणं
निमित्तत्वं तेद ... वक्ष्यते

णास्तु देशः कालो निमित्तं फलं संस्कार्यं चेति तत्र सरस्वत्या दक्षिणेन तीरेणाग्नेयोऽष्टाकपालः सत्रायणमर्थं विश्व-
जिता यजेत। आग्नेयमष्टाकपालं निर्वपेद् रुक्कामः चैत्रमाद्दीक्षणीयेष्ट्याश्वमेधे। इति क्रमेणाकर्मभेदोदाहरणानि
दृष्टव्यानि। अत्र दार्शपौर्णमासिकादाग्नेयात्काम्याद्दैशिकाद्वाग्नेयौ भिन्नौ काम्याभ्यां त्रैधातवी। विश्वजित्त्वं
संस्कारकनैमित्तिकौ ताभ्यां भिन्नौ सोऽनुपादेयगुणविशेषिता सान्निध्यरूपप्रकरणसान्निध्ये तदनुपादेयगुणसंबंधेपि
न कर्मभेदः यथा समे दर्शपूर्णमासाभ्यां यजेत। पौर्णमास्यां पौर्णमास्या यजेत यावज्जीवं दर्शपूर्णमासाभ्यां य-
जेत एतयान्नाद्यकामं याजयेत् शेषात् स्विष्टकृते समवद्यतीति ३ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वि-
हितात्काम्यात्प्रयोगादन्योऽयं यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति पुरुषार्थः प्रयोगः अग्निहोत्रं जुहो-
तीत्यादयो विधयः चत्वारः भेदान्न भिद्यन्ते शास्त्रभेदात्पुनः प्रकृतिलाना पते संनिधौ हि पुनः प्रकृति
संदिकासन्निधौ यजतीत्यादौ नासंनिधावित्यर्कं प्राक्॥४॥ इति माद्दमायाप्रकाशे द्वितीयोऽध्यायः समाप्तः॥

यागावाशिष्टपुरोडाशात् स्विष्टकृते ... काया ... स्विष्टकृतं यजतीति विहितस्य स्विष्टकृद्यागस्य शेषरूपसंस्कार्यसंबंधार्थमिदं वचनम् ४

वैचा४

प्रकरणे
अवच्छिन्नप्रकरणे
फलमाम्नातम् ४

प्रकरणान्तरस्य
कर्मभेदहेतो
स्तुल्यत्वात् ४

एक

खा २

…गादपूर्वं एव तद्प्रयोगः इति व्रीहिपदेनापूर्वसाधनलक्षणाया [illegible] धातेनापूर्वसाधनं भावयेदिति वा

व्रीहिस्वरूपे [illegible] तान्नियमतदृष्टानामनुपपत्तेः [illegible] अपूर्वसाधनत्वविशिष्ट व्रीहित्वमेवोद्देश्य [illegible] तावच्छेदक

[illegible] अपूर्वसाधनलक्षणाया [illegible] व्रीहित्वस्योद्देश्यकोटौ आनिवेशात् अन्यथा [illegible] धातानापत्तेः

[illegible] इति [illegible]

अङ्गस्यानुष्ठानसामर्थ्यरूपमुपकारं कुर्वतः इत्यर्थः =२

मातृभावः

प्र॰॥श॥ एवं सिद्धे कर्मभेदे भिन्नानां तेषां [illegible] शेषशेषिभावो निरूप्यते॥ शेषलक्षणं च नाविर्भूतत्वं आग्नेयादीनां

याज्ञानामन्योन्यशेषतापत्तेः॥ नाप्युपकारकत्वं। अंगमनुष्ठापयतः प्रधानस्यापि शेषतापत्तेः॥ अतो यः परार्थः

स शेषः। परार्थत्वं च यथा द्रव्यगुणकर्मणां वा क्षमाणानां यागप्रत्यस्ति एवं यागस्य फलं प्रति फलस्य च पुरु

षं प्रति तेन सर्वः एवं अनन्तरमुत्तरं प्रति शेषः॥ उत्तरं न्तरस्तु सर्वं एवं प्रतिज्ञेयात ज्ञापि चतुरो मुष्टीन्निर्वपति

व्रीहीन्प्रोक्षति व्रीहीनवहन्त्याज्यमुत्पुनाति शालां छिनत्तीत्यादय आंधाज्यमानानायधर्माः योग्यतया व्री

ह्यायोगाच्चोवधादिष्वेव यथायोगं भवन्तीति। अत्र व्रीह्यादिपदमपूर्वीयद्रव्यलक्षकं न यथा यवा

दिभ्यः [illegible] प्रोक्षणादिव्याद[illegible]स्यापुरितस्यापत्तेः यथेयसंस्कारव्यवस्था। एवं स्पष्टेनाह्नंति। कपा

लेषु श्रपयति अग्निहोत्रहवणानि निर्वपति उलूखलमुसलाभ्यामवहन्ति दृषदादिविनकृदपद्

पलाभ्यां पिनष्टीत्यादावपि यथाक्रतं द्रव्यव्यवस्था गु[illegible]णा व्यवस्था एवं अहरणा यापि

ना १

ति॰ ५

द्वि ४

शेषी ति ४

ष ५

ताम

ल्पाहेः

ति-२

गास्याएकहायन्यासोमंक्रीणातीत्या[illegible]दावारुणै[illegible]क्रयान्वयेपिप्रमूर्त्तत्वात्तत्कारकीभवितुमश
क्नुवानस्यसन्निहितैकहायनीद्वारैवकारके[illegible]तंनयवहितेनवासमसाक्रीणातीत्यादिवाक्यावगतवासस्यादि
द्वारैवंकमात्मस्कारद्वेगुणानांविवक्षायामपिग्रहंसंमार्ष्टीत्यादौग्रहोद्देश्यसंमार्गविधौउद्देश्यविशेषणी
भूतमेकत्वंनविवक्षितंग्रहंसंमार्ष्टीतिचैकस्मिन्नन्वयेवाक्यभेदात्॥ तस्मात्सर्वेषुग्रहेषुसंमार्गःप्राप्नो
तिग्रहस्वरूपंतुविवक्षितमेवउक्तदोषाभा[illegible]वात्तेनचमसहपदंसोमपात्रमात्रोपलक्षणमितिनचम
सेष्वपिसंमार्गप्राप्तिः॥ सप्तदशारत्निर्वाजपेयस्ययूपइत्यत्रवाजपेयोद्देशेनसप्तदशारत्नित्वविधौउ
द्देश्यस्वरूपमप्यविवक्षितं।तस्यस्वरूपेणयस्याभावेनानुप[illegible]योगात्नहिवाजपेयस्ययूपोस्तिकिंत
र्हिअग्नीषोमीयस्यवाजपेयांगभूतपशुपशुयूपोस्तीतितत्रसप्तदशत्वंनिविशतेसन्निधानात्॥ समिधोयजतीत्यारभ्यप्र
याजानिद्रष्टोहवीष्यभिघारयतीत्यंतप्रयाजावांतरप्रकरणांतर्मध्यपठितमभिक्रामंजुहोतीत्यभिक्र

धु २

याग

घा

ताम्बूलपं१

यज्ञोवचर्यते सं पादानेऽनेनैव यवचरोयज्ञपात्रमपि मंत्रवारणानां होमव्यतिरिक्तकार्यकारायसाङ्गता। वैकंकतानां तु स्रुवादीनां होमनदारिकाभिघारणाद्वारेति वैधता ८

रः स्यात्कुर्युर्यादेवैतेन = ४

लक्ष्मरू

भाट्टभाषा ३

मतां प्रयाजां गामेव संदृश्याम ध्यपातितं सन्नमहाध्वकरत्तामनुगच्छतीति सामिधेनीरन्वाहेत्यारभ्य श्रूंतरान्त्वं
सदेव वायेस [illegible] तं सामिधेन्यवांतरप्रकरणावद्रासमानमपि तन्मध्यपठितं देवे [illegible] द्रोमान्विद्ध इत्यादि
भिर्निर्विन्मन्त्रैः प्रकरणविच्छेदात्तन्मध्यपातितमपि यदुपव्ययते देवं [illegible] मिव तत्कुरुतेऽह्नसुपवीतं दर्शयेव ॥ "यज्ञो
व.च रोवैकंकतो यज्ञावचरं इति श्रुनारभ्याधीतत्वा [illegible] स्त्रुवक तिद्धारायज्ञपदोदितात् खिलयज्ञाङ्गस्य पात्रो
राशिस्था न्यभागगतयो वा वैघ [illegible] लिंगकमंत्रयोर्द्वयं लिंगकयोः स्रुवात्रे धीपोरणीमास्यामन्त्र्येते ॥व्य
धन्वतो स्वमावास्या यामिति वा क्वाद्धि नियोगः हस्तावनेजनादि सौमाग्निं प्रकरणात् ॥ पुरोडाशं चतुर्द्धा कु
रोतीति सामान्यवचनेनाग्नेयं चतुर्द्धा करोतीति विशेषवचनेनोपसंह्रियते ॥१॥ ॥यद्यपि मेत्राणाम् मुख्यपु
वद्धत्वाविधेयार्थप्रकाशकत्वं सर्वत्र सिद्धं तथापि ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यादौ इतीयाश्रुत्या ऐ
न्द्रस्य मंत्रस्य लक्ष्या गार्हपत्यप्रकाशकत्वमुपेयते ॥ स्रक् तस्य पक्षपादि नद्रप्रकाशेन सामर्थ्यं हपस्य

ए ३ — वार सौ ३

रः स्यान्नन्वे तैनेन्कुर्यात

ती ३ — वैक ४

ए १ — राम

लिंगस्य दुर्बलत्वात्॥ सूक्तवाकेन प्रस्तरं प्रहरतीति तृतीयापक्षे स्यादिदं द्यावापृथिवी भद्रमभूदित्यादिमंत्रगण
स्य सूक्तवाकसंज्ञस्य प्रस्तरप्रहरणांगता गम्यते॥ तेनाग्निरिदं हविरजुषतेत्यादिमंत्रवर्णाद्देवता लभ्यते॥
प्रस्तरो द्रव्यं प्रहरतिर्यागवच[■]न इति लभ्यते। तृचे एव देवताप्रकाशनेन कृतार्थस्य तस्य पुनर्विनियो
गो न युज्यत इति तद्रूपत्वाक्षिनेकाले स्कन्धारणादौ कृतार्थस्य प्रस्तरस्य प्रतिपत्तिरत्र विधीयत इति वा
च्यं। किमि[■]ववचनं कुर्यान्नास्ति वचनस्यातिभार इति न्यायेन कारकश्रुतेर्लक्षणायाः क्षपाबलवत्त्वेन
वचनत्स्वं दृढः प्रहरतिरित्युद्देशात्संस्कारार्थो होमविधानेइति कल्पनात्। सूक्तवाकेनेति तृतीयया कृत्स्न
स्य तस्य प्रहरणांगत्वेपि लिंगवशात्सर्वेद्रूपविभज्यविनियोगः कल्प्यः॥ अन्यथा दर्शपौर्णमासाविदंह
विरिति मंत्रे ऽस्तं तानर्थकः स्यात् अज्ञानर्थक्यप्राप्ति हतानां विपरीतं बलाबलमिति न्यायेनात्र लिंगबला
त्तृतीयाक्ष्मतिः सूक्तवाकैकदेशं लक्षयति॥ काम्यकांडे ऐंद्राग्न्यागान्विधाय तल्लिंगका नि

न५
व४

समाख्यावशात्स्वस्थाने एव निविशंते । क्रमः स्थानं सन्निधिरित्यनर्थान्तरं । भक्षेहि माविशेत्यादेर्भक्षमंत्रस्य भक्षानुवाकसमाख्यामात्रेण न कृत्स्नानुवाकस्य भक्षणा १

भाट्टभाषा

त्वत्र २

पाज्मानुवाकाद्युगलान्त्मा तानिर्द्युद्रसी रोचना दिवइत्यादीनि नानालिंगमन्त्रान्सर्वत्र विभज्य नैकिंतु त्वत्समे [illegible]
नैकिं ग्रहणावेक्षणासम्भक्षणादेरपि प्रकाशनाद्यथालिंगं ग्रहणादौ मंत्रा भवन्तीत्युक्तो । भक्षमंत्रेन्द्रपीतस्येति
पदं च ग्रहणाग्रणां सोमानां भक्षणे जहनिहति वानभजत तद्वेत्तोरिन्द्रपीतस्येत्यस्यार्थस्याविवक्षितत्वात
किंतु इंद्रपीतस्य सोमपस्मिन्स्स वनेन दिंद्रुपीतं तत्स्य संबंधिनं सोमभक्षयामीत्यस्यार्थो विवक्षितः । [illegible] हलोप
हेतोस्त्तीयातत्पुरुषान्यपदार्थप्रधानस्यापि वहु[illegible] समासलघुत्वात । सर्वे च सोमा ऐन्द्रा इति पवनस्स वाधि
न इति सर्वेषां यथाम्नानमंत्रकं भक्षणं ॥ २ ॥ ॥ श्रुतिलिंगयोर्विनियोग उक्त: वाक्यप्रकरण स्थानसमाख्या
भिर्विनियोगस्थित्यत [illegible] तत्र च पौवेदाद्युजायत्ता इत्येदो वाय
र्यजुर्वेदः आदित्यात्सामवेद इत्यर्थवादेनोपक्रम्य ऋचैवोच्चा क्रियते उपांशु यजुषा उच्चैः साम्नेत्युच्चैष्ट्व
विधीयते ॥ तत्र मंत्रब्राह्मणात्मकेषु वेदेषु पादबंधवती गायत्र्यादिरेव ऋक् । असंजातविरोधिनाउ

ऊ४

श्रीहि ५

राम

दिकं

स्य ५

पक्रमगतवेदपदेन संजातविरोधिविध्युद्देशगतमपि स्वर्गादिपदं स्वविषये अवस्थाप्यते। ननु विधिप्राधान्यात्तु वैपरी-
त्यं वक्तुं शक्यं॥ यत्र विरोधस्तत्रैव लक्षणाया औचित्यात्। गुणो ह्यमायकल्पते तस्यानुपसंजातविरोधिन्यर्थवादेऽप्य-
प्रवृत्तेः॥ तस्मादेकपदेनैव वेद एव व्याख्यो न त्वश्रातं॥ तेन ऋग्वेदान्तर्गतानां यजुषामप्युच्चैस्त्वं यजुर्वेदगता-
नामृचामप्युपांशुत्वं फलं। अत्रोपक्रमोपसंहारैकवाक्यत्वेन यावेदधर्मोऽयमवधारितः। इति वाक्यशेषेनायं
विनियोगः। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र दर्शपूर्णमासाभ्यां स्वर्गं भावयेदित्यवगते केन प्रकारेणाभा-
वयेदित्याकांक्षायामाह समिधो यजति व्रीहीनवहन्तीत्यादिना। तेनासमर्थः समिदादिभिरारादुपकारिभिरवघा-
तादिभिः सन्निपत्योपकारिभिश्चाङ्गैः संपन्नौ तौ यथा फलं साधयितुं क्षमौ भवतस्तथा यजेतेति गम्यते। तत्र च
उपकारार्थिनियोगे उपकर्तुं समर्थानां प्रयोजनाकांक्षाणामङ्गानां चान्योन्याकांक्षालक्षणेन प्रकरणेन शे-
षभावः। दर्शपूर्णमासादौ येन क्रमेण कर्मणामाम्नानं तेनैव मन्त्राणामप्यस्तीति उपांशुयाजस्थाने

भाट्ट.भा.पा.२

परिगतोदध्विनोर्मासीति मंत्रं श्रुत्याद्यभावेपि स्थानप्रमाणाद्देवोपांशुयाजांगत्वं भजते। दर्शपूर्णमासादिष्वाध्व
र्यवहौत्रौद्गात्रादिसमाख्यया स्थानात्पदार्थाः केऽपेक्षाः संति ॥ कर्तारश्चाध्वर्य्वादयस्कार्यापेक्षाः संतीत्येवं ये न
केन विधावाकिंचित्कर्म कर्त्तव्यमित्यनियमे प्राप्ते समाख्यया प्रमाणेन क्रियाकर्तृसंबंधः सिध्यति। अथैतेषां बला
बलं चिंत्यते तत्र सूत्रं ॥ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति ॥ स
ते षु श्रुत्यादिषु परं परं दुर्बलं कुतः अर्थविप्रकर्षात् ॥ श्रुतिर्हि निरपेक्षत्वाद्रूपा स्वयमेव विनियोक्त्री भवति ॥ लि
गं तु श्रुतिकल्पयितृत्वेन विनियोजकं न स्वातंत्र्येण ॥ एवं वाक्यं लिंगश्रुती प्रकल्प्य विनियोजकं ॥ एवं प्रकरणा
द्यपि स्वकल्पनयास्थानचतुष्टयस्य समाख्यापंचकस्येति विप्रकर्षो ज्ञेयः ॥ तत्र श्रुतिलिंगयोर्विरोधे श्रुतिर्बलीय
स्त्वमुक्तं। ऐंद्र्या गार्हपत्यमित्यत्र लिंगवाक्ययोर्विरोधोपि स्योनं त इत्यत्र वाक्यात्कृत्स्नस्यैकमंत्रत्वे प्राप्ते लिंगात्
सदनकरणस्थापनरूपार्थद्वयप्रकाशकात्मंत्रभेद इत्युक्तं। वाक्यप्रकरणयोर्विरोधोदाहरणं सूक्तवाके

पू

राम

रुत्र

सचालिंगवशात्सर्वं दृष्टोऽग्निरजा आदिगनियोऽग्नस्त्वंमुक्तं॥ तत्र तत्र इ दं ह विरजुषेतामित्यादीनि पदानि प्रकरणाविशेषेपि अन्यत्र न प्रयुज्यन्ते॥ अपि तु वाक्यस्य बलवत्त्वादग्नीषोमावित्यने नैव संबध्यंते॥ तत्र श्चैकवाक्यत्वादग्नीषोमाभिप्रकाशनसामर्थ्यं ततः श्रुतिस्तनो वि नियोग इति सन्निकर्षः इंद्राग्नीपदे नु तु प्रकरणाद्द्वाए एकवाक्यत्वमिति विप्रकर्षः॥ त स्मात् द्वाभ्यां प्रकरणाद्बलवत्तरस्थानप्रकरणयोर्विरोधस्तु इष्टिप्रसु सोमयागात्मके राजसूये अभिषेचनीयाख्यः सोमयागे लिंतृत्संनिधौ पठिता देवनाद्य यावन्तः प्रक्र[illegible]न[illegible]कथं भावे निरा[illegible]काक्षे अभिषेचनीयेस्य प थाकथं चि संनिधानादाकांक्षां प्रकल्प्याङ्गत्वं कल्प्यते तत्र प्रागेव प्रकरणाद्राजसूयाङ्गत्वमेषां ग[illegible] म्य ते अतः संनिधेः प्रकरणं बलवत्॥ क्रमसमाख्ययोर्विरोधस्तु पौरोडाशिककांडे सान्नाय्यपात्र शुंधनक्रमे पठितः शुंधध्वमिति मन्त्रो यावता समाख्यया संबंधं प्रकल्प्य पुरोडाशं गता नीयते तावत्सन्निधिः क्लृप्तसंबंधो दाव आकांक्षाक्रमेणैकवाक्यत्वं ततः सामर्थ्यं ततः श्रुतिश्च प्रकल्प्यते तस्य सान्नाय्याङ्गत्वं विधत्ते इति सम

सान्नाय्यपात्रशुंधनप्रकाशनसमर्थं १

शुंधध्वं दैव्याय कर्मणे देवयज्यायै इति मंत्रः

शुंधनं प्रतीक्षा लक्षणं तस्य कर्मो यादृशस्थाने शुंधनविधिर्लि दृशस्थाने मंत्रः संहितायामित्यर्थ

[illegible] देशसामान्यलक्षणः संबंधः

ग

त

कल्पनामूलभूतप्रयोजनाकांक्षोच्छेदात्

भाट्टभाषाप्र

ख्यातः सन्निधिर्बलवान्॥ अत्र क्रत्वादिभिर्लिंगादीनां बाधः कल्पनामूलैर्लौकिकैर्लैंगिकादिकल्प्यपदार्थस्य अप्राप्तत्वाये
देव। प्राकृताः कुशादयस्तु प्राप्ता एव सन्तो वैकृतैः शरैर्बाध्यन्ते। एवं आहवनीये जुहोतीति सामान्यशास्त्रेणाप्राप्त एव
आहवनीयः पदे जुहोतीत्यनेन विशेषेण बाध्यत इति तान्त्रिपीलुकादस्याप्तबाधाह्याशमिकः प्राप्तबाधो विलक्षण इ
ति ज्ञेयं। ज्योतिष्टोमे ~~तिस्र एव ... उपसदो द्वादशाहीनस्य ... बाधो विलक्षण इति ज्ञेयं।~~ ज्यो
तिष्टोमे तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येत्यत्राहीनपदं नहीन इति योगाज्ज्योतिष्टोमे वर्तते तत्रैव द्वादशो
पसत्त्वमपि विधीयत इति न अहर्गणो हीन इति द्विरात्रादावहीनशब्दस्य रूढत्वात् अह्नः खः क्रताविति अहः शब्दा
त्समूहे थे ख प्रत्ययस्तस्यापन्नादि सूत्रेण ईनादेशे आद्युदात्तश्चेति प्रत्ययस्वरेण ईकारस्योदात्तत्वे मध्योदात्त
पदं चात्र पठ्यते॥ नञ्समासे त्वव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं स्यान्नचैतथा पठन्ति॥ तस्मादहर्गणे
त्वद्वादशोपसत्त्वमुपसत्त[illegible] लुप्यर्थ। अत्र कीर्तिसमानमित्युच्यते॥ तत्रैव पुर्वं हिस्यपत्नीरिति द्वयोर्यज

त्वं।

केहा

राम

12

मानयोः प्रतिपदं कुर्यादित्यत्र द्वित्वं न स्त्रीपुंसनिमित्तं। अग्नीषोमयोर्यजमानत्वस्यासत्कलात्। सोमेन यजेतेव
संतेभ्यो तिवायजेतेत्युत्पत्तिप्रयोगचोदनयोरैक्यात्तोपात्तं गुणभूतं यदेककर्तृगतमेकत्वं विवक्षितं चातो द्वियज
मानत्वं कृत्वा याहीनादिषु उत्कृष्यतऽएव॥ दर्शपूर्णमासयोः पत्न्यभावे पिजाघन्मायत्नीः संयाजयंतीत्येतन्नोत्कृष्य
ते। तृतीयाश्रुत्यायागांगत्वेनत्वाद्द्वीयमानत्वात्। लौकिक्या। पिजाघन्मायत्नीसंयाजानां दृष्टाकांक्षानिवृत्त्युपपत्तेः॥
दर्शपूर्णमासयोः षष्ठाप्रपिष्टभागदः निष्कृततंत्रप्रकरणैक्याभावाघत्वात्तु मीमांसादौ पौष्मष्वहस्तत्रऽउत्कृष्यते॥
पुरोडाशे प्राप्तत्वात्पशौ च हृदयादिस्वरूपनाशापत्तेः। पृषदाज्यस्याविधेयत्वान्न पिष्टं चरावपि पाकवैशद्येन चरु
शब्दप्रयोगोपपत्तेश्चरावेवपोहलेपेयथां देवतान्तरविशिष्टे तु पुरस्मिन्नयेबगां। विशिष्टस्यातिरिक्तत्वात्तत्केवलध
र्मस्याप्रवृत्तेः॥३॥ ॥दर्शपूर्णमासयोः नीवीतं मनुष्याणां प्राचीनावीतं पितॄणां उपवीतं देवानामुपव्ययतऽउ
ति श्रुतं तत्र सदोपवीतिना भाव्यमिति स्मृतेः॥ नित्यं उपवीतस्य प्राप्तिरस्तौ निवीतमित्यर्थवादः। उपवीतं चस्य

पुरोडाशनिष्पत्तेः श्रेयस्त्वात्पूर्वकतया तत्र श्रेयस्त्वमनुसार्य प्रा..त्वा दित्यर्थः =४

पुरोडाशेपशौच

यो ब्राह्मणायावगुरेत्तं शतेन यातयेत् इति पूर्ववाक्यात् ~५
ब्राह्मणं हन्तुमुद्योगं कुर्यात् तं शतेन संवत्सरशतेन निलाख्यमित्यर्थः यात येत्यातना
मनुभावयेदित्यर्थः ~५ सुन्दराङ्क

आहवनीयं प्रति गच्छेत्

त्वात्पुरुषार्थत्वेन प्राप्तमपि क्रत्वर्थं पुनर्विधीयते॥ संभव[illegible]ति हि पुरुषार्थोल्लंघनेपि क्रत्वैगुण्यं मन्यमानस्य त
दप्राप्तिरिति॥ स एवं तत्रैव नान्यत्र वदेदित्यस्यापि पुनर्विधिर्ज्ञेयः॥ मृ[illegible]ताग्निहोत्रेष्वध्वर्यु[illegible]न्तस्मिधं धारयेत्[illegible]द्दे
भ्य उपरि हि देवेभ्यो धारयतीति विज्ञायत इत्यत्र परप्रकरणोपात्तत्वादपरिधारणमपि विधीयते दर्शपूर्णमासयोः
तस्मात् जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू इति मन्त्रः वाक्यप्रकरणयोरविरोधात् क्रतावपि जृम्भायाः संभवात् न प
क्रतं क्रतुमुल्लंघ्य वाक्येन पुरुषार्थेपि स्यादिति॥ तथैव तस्माद्ब्राह्मणायावगुरेत न स्वर्गो रणानिषेधश्च योब्राह्म
णायावगुरेत्तं शतेन यातयादिति यातनाख्यदृष्टफलश्रवणात् क्रतुमुल्लंघ्यापि पुरुषार्थे पर्यवतिष्ठ
ते एवं सत्यनृतवद्यासः सा न संवदेतेत्यपि पुमर्थमेवैतामपरुद्ध्य यजेतेति वचने न क्रतुमध्येऽपरुद्धयात्या स
ह संवादप्रसक्ते॥ तस्मात् सुवर्णं हिरण्यं भार्यं दुर्वर्णोस्य भ्रातृव्यो भवतीत्यत्र पुरुषार्थास्य[illegible] इति पूर्वोक्ता
वाहरणीष्टिर्वैदिके एव प्रत्यवदानेन तु [illegible] लौकिके॥ दर्शपूर्णमासयोराम्नातेषु पाकयज्ञो भवतीति तथाऽप

भानु

राम

स्रुगग्रात्तिर्यगभिधारयति हिर्हिर्विभागेऽवद्यति। चतुरवत्तं जुहोतीत्यत्र कृत्स्नस्य पुरोडाशस्य यागो यद्यप्यलेपि प्रक्षेपो
ऽवदानमात्रस्यैव कर्तव्यमिति भाष्ये। अवदानमेव यागो यं द्रव्यमिति वार्त्तिके॥ एवं चावकृतनाशे पुनराप्यनूनाद
वदानं प्रयमाणत्सु पप्रव्रतेऽस्मयातदन[illegible]र्थं कस्मात् पुनः कृत्स्नस्योत्पत्ति स्वस्यात् हुते पुरुषवदाने सुशेषाणां। तत्र ३
ला ४ प्रतिपत्त्यपेक्षत्वात्सर्वेभ्यो हविर्भ्यः स्विष्टकृदादीनि स्युः शेषकार्याणि। आग्नेयं चतुर्धा कृत्वा इदं ब्रह्मण इदं होतुः
लि ५ इदमध्वर्योरिदमग्नीध इति निर्दिशेनर्त्विजामान[illegible]स्यर्थं परिके यानकर्तुरुपाकात्तेसकृत्स्नस्य हविषो देवतायै प्र
क्षेप्त्वात्र यजमानस्य साम्याभावेन ततः परिक्रियायोगात्॥ शेषस्य तु प्रतिपत्त्यपेक्षत्वा[illegible]द्रव्यार्थेप
वार्थं निर्देशः॥ ६॥ उपांशुयाजद्रव्यात् ध्रौवादपि स्विष्टकृदादीनि प्रतिपत्तिकर्माणि कर्तव्यानीत्यस्मन्मा
तुपस्तरणाभुपयोगिनोऽकृतार्थस्य ध्रौवस्य प्रतिपत्त्यनपेक्षत्वान्न सर्वं तेन चतुर्थे वा समिष्टयजुर्हुते म
न्त्रियत इति न ततः शेषकार्याणां प्राप्तिः प्रकृतं जुहूमिति क्रमणामस्ति साकं प्रस्थायीये तु सहकुंभीभि

प्रकर्षेणादतन्यात्

लिभिन्योन्यग्रोधा कुरा: फलानिवा इति प्रमा

पूर्वपक्षे यजमानचमसभक्षो याग: सिद्धानोफलचमसेनैवेति

रभिक्रामतीतिजुहूमपहायकुंभीरेवहोमकार्यैनिवेशाये दित्पवगम्यते ततश्चतत्रापिशेषाभावान्नशेषकार्यप्रा
प्ति:॥ अत्रसोमभक्षोवहुप्रकारोविचारित:। यदिराजन्यंवैश्यंवायाजयेत्सयदिसोमंविभक्षयिषेन्न्यग्रोधस्तिभिनी
राहृत्यता:संपिष्यदधमुन्मज्य तमस्मैभक्षप्रयच्छेन्नसोममितिस्मत्रपघपिहितिमेनीचमसस्यउपक्रमोपसंहा
रयोर्भक्षमात्रेसंवंधोक्तितथापिसोमभक्षस्थानेनिवेश्यमानोयंतद्धदेवयागीयद्रव्यसंस्काररूपोभाविष्यती
ति।भक्षसंवंधकथनेव्याजेनतद्धाताऽवगतयागसाधनत्वेनायंफलचमसोविधीयते॥ तद्दिधौचभक्ष:प्राप्त
एवानूद्यते॥ एवंसोमभावेदृष्टीकानभिषुणुयादित्यभिषवयुक्तपृष्टीकानामपियागसाधनत्वंज्ञेयं॥५॥
यस्यपर्णमयीजुहूर्भवतीत्यनारभ्याधीतंपर्णतादिकंप्रकृतिद्वारैवविकृतिंप्रतिपद्यतेजुह्वादिवत्।न
तुविकृतावपितद्विधानंन्याय्यं॥ अतिदेशेनजुहूद्वारैतत्प्राप्तौस्यांपुनर्विधानायोगात्॥ सप्तदशसा
मिधेनीरनुब्रूयादित्यनारभ्याधीतंसाप्तदश्यंपादेश्यावरुद्धायांप्रकृतौनिवेशमलभमानंविकृतिमेव

१ माहृभाषाद

भर

१५

यादिसोमंनविन्देतेद त्याहि:=४ पृतीकान् सोमस्य हरलता विशेषा:

व

लिभिन्योप्रुक् लानि

स३

न्यग्रोधगुप्रुफला पसफलसाविशे चम्यते इलिनोर्य फलचमस:

प्रयोग…नपूर्वपक्षेविके लापर्णता लोपेअनर्थ हित…प्रनोनियम प्राप्ते

राम

त्वात दशिमत्वेनफल दविरित…भावा…न तुरकं…तनिमत्ते निमित्तं

च

वर

श्यं द्दशमे

अयनेतत्रापि अकृत्स्नसंप्रदर्शो मित्रविंदादिकमेवेति वक्ष्यते ॥ सामान्यतः प्रथमं ज्ञाप्यं ब्राह्मणादिषु सावकाशं च
नित्यं पांचदश्यं सप्तदशा वैश्यस्येति वैश्ये निमित्ते नैमित्तिकेन विशेषेण साप्तदश्येन पाश्चात्यतया द्वैवं बाधविनाऽस्य
त्मानमलभमानेनेन वैश्यमात्रविषयतया निरवकाशेन बाध्यते ॥ एतैरेवहेतुभिः काम्यं एकविंशतिं प्रजाकामस्ये
कविंशत्याद्यनुवचनं नित्यस्य पांचदश्यस्य बाधकं ॥ आसन्नपुरुषार्थत्वान्नैमित्तिकस्यापि साप्तदश्यस्य ॥ एतेन
चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्येति गोदोहनेन चमसबाधो व्याख्यातः ॥ आधानं पवमानेष्टयश्चाग्नियः
सन्निहिताः समाम्नाताः तत्र फलवदग्निहोत्राद्यर्थत्वादस्य पन्नफलवत्त्वात् तदर्थमाधानमिष्टयस्तु श्चैस्यं
आधानांगं वेत्यस्मदेतन्ननु जुहूद्वारा परीत्ते वाग्निद्वारा आधानमपि प्रकृत्यर्थमेवेति चेन्न दृष्टं तत्रैव स्मात् ॥
लोकप्रसिद्धजुहूस्वरूपस्यानन्यतोपि संभवेन परीत्तापात् तत्स्वरूपेऽप्यानर्थक्यादग्नत्यापूर्वकार्यंगतं ॥ आहवनी
यादेस्तु दृष्टरूपत्वेनाधानस्य तत्स्वरूपार्थत्वात् तदर्थमेवाधानमित्यर्थः ॥ नैमित्तिके कर्मार्थस्ति मि न्मा

नेन

भाट्ट्भा॰पा॰३

15

दिन नित्येन सोमेन समानविधानं भवत्यनित्यत्वात्। तेन तत्र सोमइव क्रयादेरप्राप्तिः॥ प्रतिनिधौ तु शिष्टव्रीह्यादिदृ
श्यमानसादृश्यपाद्यादीयमाने नीवारादौ मुख्येन समानविधानं भवत्येव॥ मुख्यदृष्टावदयवानां बहूनां तत्र दर्शनात् सर्वांवि
सदृशेपि न सोमाभावे पूतीकानां [illegible]भिषुणुयादिति वाचनिके प्रतिनिधावपि वच[illegible] न बलादेव सादृश्येन मुख्ये
न सह समानविधानत्वं च ज्ञेयं॥६॥ ॥ वैदेरखननीत्यादीनां वेद्युद्धिश्मरणां वृत्तां हवीष्यासादयतीत्यंगप्रधा
न साधारणाहविःशब्दात्साधारणं प्रधानत्वं हविर्मात्रार्थत्वेन हविश्शाब्दस्य संकोचे नियामकाभावात्॥ केश्म
श्मश्रुवापादयस्तु नोंगप्रधानार्थाः क्रियांगस्य तत्कर्त्रंशानंततःपातित्वात्। असंस्कृतस्यापि कर्तृत्वसंभवाच्च॥
भोक्तृत्वं तु क्रियांप्रति प्रधानस्य तमिति दृष्टं चात तत्फलगामस्तान्ताः संस्काराः प्रधानार्थाः न तु गुणार्थाः॥ गुणानां च
परार्थत्वाद संबंधः समत्वात्स्यादिति न्याये नैतेषां गुणत्वाविशेषेणानियोगानित्वायोगात्॥ यजेत

स्वर्गकाम इत्यात्मनेपदात्कर्तृगामित्वं क्रियाफलस्य गम्यते॥ कर्त्रे वैन च बहुविस्यागदक्षिणादानादेरम

णम

चप्रयोजकत्वेनापियजमानस्यसंभवातोंनित्यवदाम्नातपरिक्रयसामर्थ्यादेकेनकात्स्न्र्येनानुष्ठानायोगादमै
रपिकारपित्वं।तेचइष्टोनामभेदात्तेषांभेदाच्चत्वारः ब्रह्माहोताध्वर्युरुद्गातेतिचातुर्मास्येषुप्रतिप्रस्थाता पं
चमः।पशौमैत्रावरुणः।सुत्वे।सोमेषुरव्याश्चत्वार ब्रह्माहोताध्वर्युरुद्गातेति ब्राह्मणाच्छंसाग्नीध्रःपोताचेति ब्रह्म
णोद्वितीयस्तृतीयचतुर्थाः।होतुस्तुमैत्रावरुणोऽछावाकोग्रावस्तुच्च।अध्वर्योःप्रतिप्रस्थातानेष्टोन्नेताच।
उद्गातुःप्रस्तोताप्रतिहर्तासुब्रह्मण्यश्च।।सदस्यःसप्तदशोवैकल्पिकः।तदभावेयजमानःसप्तदशःपत्नीअ
ष्टादशीदशचमसाध्वर्यवःशमितासोमविक्रयीचेतिद्वादशनेभ्योमेउपगातारस्तल्विख[illegible]वांनमेता।
नेषांचकार्यव्यवस्था।आध्वर्यवंहौत्रंऔद्गात्रमितिकाण्डसमाख्यावशादेवआहवनीयेजुहोतीत्यादि
वचनप्राप्तिस्तथैवआहवनीयादयःप्रकृतिविकृत्यात्मकसर्वकर्मार्थाः।अनारभ्याम्नातत्वेनापृथकरण
धीनत्वात्॥९॥ ॥दक्षिणायाद्वादशशतदानादिसंस्कारःअभ्युक्षवापादिजन्यपनाप्तीयादित्यादि।ए

घ्य हं १

१६

इमुष

आड्भागयाः

तानि समाख्यानस्याध्वर्यवाण्यपि यजमानस्यैव अध्वर्य्वादिपरिक्रीतत्वात्क्रतुयोग्यतामेक्ष्य तत्फल
भागित्वाद्यन्तु परन्तामिष्टकामुपदध्यात्स्त्रीन्वरान्ददामि हिरण्मयमालिनः प्रचरन्तीत्यत्र ऋत्विजऽ उपव
संनीत्यादिवचनेनत्वृत्विजामेव हिरण्यमालित्वादिसंस्कारागायोवत्संस्कार्यमावर्त्यत्वात्सर्वत्विग्विषय
त्वाद्यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुयादिति सदोमानादि बुद्धेरध्वर्युकांडस्थे
राययप्युरेवं फलं वचनात्स्यात्मने च यजमानाय च यं कामं कामयते तमागायतीत्यादौ वचनादृत्विजो
पि स्यात् पुदीक्ष्य ग्रे स्याद्युमेदहीतिप्रत्यगाशिषोमं नाध्वर्यवस्यानपि यजमानस्यैव प्रयुज्यात्फलस्य
जमानगामित्वात्तल्लिंगेन समाख्याबाधश्च वाजस्य मे त्यादय स्तु कांडद्वय पाठादध्वर्युणा यजमानेन च
प्रयोज्याः वाजपेये रुद्रपत्नी यजमानं वाचयतीति वचनाद्धि द्वयोरपि यजमानस्य वाचनं ॥ वत्संचोपाव
सृजत्सुखां चाधिश्रयतीत्यनुकीर्त्य षण्णानि वै द्वादश द्वंद्वानि दर्शपूर्णमासयोस्तानि य एवं संपाद्य

आयुर्यज्ञेन कल्पन्तामित्यादि मंत्राः
कृत्प्रत्ययः=२

धा=३ क्रा=४ एव

गा

राम

कः

चा

यजन्तइतिहेतुः संपादनं आत्मनेपदागमित्तेयस्तु कार्यं संपाद्यं यजत इति कारकत्वात्संपादनयजनयोः स
मानकर्तृकत्वावगतेः पूर्वः पक्षः प्रयोजकत्वेनापि हेतुत्वान्नायं यजमानकर्तृकत्वसम्भवात् अध्वर्युकाण्ड पाठ
वाध्वर्युरितस्त्वेयं कर्तेति राद्धान्तः अग्नीषोमीये पशुप्रकृतौ पशुपस्य परिव्याणे परिवीरसीत्यध्वर्योर्मन्त्रः यु
वा सुवासा इति होतुः कुंडपायिनामयनादौ कोलिसमासे यो होतासोध्वर्युरित्यध्वर्युकार्ये विहितस्सहोतुः
वाचनिकोध्वर्युमन्त्रः चोदकप्राप्तहोतृमन्त्रं बाधते पैवाणां तदर्थानां चकेनोतेमे प्रोक्षणीरासादयेत्या
दिमध्यमपुरुषप्रयोगाल्लिंगात् ॥ तत्रापि प्रैषकर्ताध्वर्युस्तदर्थकर्तात्रीदादिः मम ग्ने वर्चो विहवे
ष्वस्त्वित्याद्यध्वर्युमन्त्रगं फलं मम यजमानस्येत्यध्याहारेणायजमानगतमेवेमामासंनाप्रमित्यादि
केत्वलिंगात् मेवत्नी सहेत्याद्युभयगतमेव मन्त्रपदव्याख्या ॥ इति श्रीभाट्टभाषाप्रकाशे तृतीयाध्या
यः ॥ ३ ॥ अथयत्रानेकशोबीतनेकः योयं यथुके कोनेति चिंतानन्तफलं चतुरोद्वापाकेपालेन्पुतुषा

ने

कपालेषु तुषधारस्त्रं अनु

नुपवपतीत्यादौ कपालस्य तुषोपवापं गलेपि यत्रासौ यैर्च रौ तुषोपवापे सत्यपि कपालेनासादनीयं कपाले
षु पुरोडाशं श्रपयतीति तत्र योऽन्ते कस्य पुरोडाशस्याभावात्तादृशस्य लेहस्ते नैव तुषोपवापइति तत्र पक्षे
तोः साधनेन क्रतुप्रयोक्त्वर्थं यत्तु रूपं प्रीणापतिनाय सिद्धं ब्रह्म तेः फलादन्यत्तद्दृष्टादिकं तत्सुत्वप्रयो
ज्यं पुमर्थं यथा चमसेनापः प्रणायेद्गोदोहनेन पशुकामस्येत्यत्र पुरुषाय न माश्रित्य पुरुषार्थं साधय
द्गोदोहनं स्वार्थी क्रतुमप्युपकरोति एवं च ब्याजेन मपित सक्रत्वर्थे लेत्सेनाप्यर्जितेनारंभसिद्धेस्पवास
धसुवर्णाद्यो का [illegible] त्ति क्रत्वनुपक्रमे दोषदर्शनं नैसंगच्छते ।। न स्यात्तपि पुमर्थमेव सत्तु क्रतुना
वप्युपकरोतीति नेक्षते घृतमादित्यामिन्यत्र नन्नुः किपान्वयेयत्रु क्रत्वर्थमुपदादित्यावेक्षणां प्राप्तं तस्य
प्रतिषेधो भवति तेन तस्य ग्रहणाग्रहणावत्ते द्विकल्पेन [illegible] जर्थस्य स्त्रोतो लभ्यते न त्थापित स्वत्रतामसु
पक्रमाननुगुणत्वान्निषेधपक्षम [illegible] पहाय उपपदार्थेन नञो न्वयात्स्यपर्युदासपक्षमाश्रित्य स्त्र [illegible] नी

चेद्घृतेयो दर्शपूर्णमासयाजी सन्नमावास्यां वा पूर्णमासीं वा निपातयेदिति - ५८४

पत्के ग्वि दक्षा । नुष्ठानस्येव प्रधानोपक्रमत्वेन द्रव्यार्जनस्यैव दर्शपूर्णमासोपक्रमत्वात्

राम

स्मरणासंकेतो लक्ष्यते तेन विकल्पदोषो नानुषज्यते एतावता हि न सा युक्तो भवतीति वाक्यशेषरूपं फलवचन
मर्थवद्भवति यष्टुना यजेत स्मत्र यष्टुरुपादेयः तच्च कारकाणां क्रियायैवान्वय इति नियमात्कारकेणा समानप्रत्य
यपक्षत्वात्समाख्यातो सस्थानद्वारा क्रियामेवोपसर्पति न समानपदोपात्तमपि कारकापेक्षयाव्यवहितं यष्टुं स्वत
ति ॥ तेन सर्वेषां विशेषणानां पादेयगतं विशेषणमविवक्षितमेव एवं लिंगमप्युपादेयगतं
विवक्षितमेव सिंहः सिंहीमादौ ततोऽप्ययं विशेषवृत्तिपक्षेऽपि प्रतिपत्तव्ये न च खिष्टकृदादीनि स्मरणांशे
नवागोपदमदेवं तं संस्कुर्वन्ति स्वागांशे नादृष्टमपि कुर्वन्तीति ज्ञेयं ॥ यथा चैतः सन्निधानादुपादेयगतमे
कत्वादिकं क्रियायां प्रयोज्यं एवं न श्रेपयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन
मित्यत्रापि सेति तत्पदेन प्रकृतस्य पयसः वामिक्षा लावगमात् स्पेवव हि कर्मणामानयतिं प्रति मुख्यकर्म
त्वावगमात्तदेवानयनं प्रयुक्ते न तु वाजिनं शादृतोऽर्थतश्च विधानात् ॥ अतः राद्धो त्विष्टकृतमित्युत

कर्मकाण्डैकत्वेऽपि भेदाः प्रयोजनं न विरुध्यते मंत्रपाठे द्रव्यप्रक्षेपो देवतोद्देशनत्यागश्चेति चत्वारोंऽशाः –४

...तदर्थं दध्यानयनं सिद्धान्ते तु न किन्तु वाज्येन समापनम् =१

धर्मा ३

प्राजापत्यान्यत्र दशापशूनाल मैने निर्विहिताः २४

हविःसंस्कारः यद्यप्ययमदृष्टार्थः ... तियमादृष्टरूपत्वान्नदृष्टार्थतां

र्थ्यं नहविरंतरं कर्तव्यं अपितु विनियुक्तस्यैवायं विधिर्विनियोगो वाक्यात् प्रयाजशेषेण हवींष्यभिघारयतीति श्रुत्या गम्यमानोपि हविःसंस्कारोऽदृष्टार्थत्वान्नादृष्टे प्रतिपत्तिरूपदृष्टप्रयोजने संभवतीति तद्योगात् ॥ अतः प्रयाजशेषं हविराधिकरणो न स्यात्(?) गोनसंस्कुर्यादिति तदर्थः ॥ अधिकरणनियमात्तु संस्कारोपि दुमुभयार्थत्वमपि ॥ फलं तु वाजपेये क्रतुपशूनां प्राजापत्यानां च सहोपक्रमेपि प्रातःसवने क्रतुपशूनामालंभो माध्यंदिने तरेषां तत्र प्राजापत्यवपाभिघारणार्थं शेषः स्थाप्यते इति पूर्वपक्षे न स्थाप्यत इति सिद्धांते ॥ शाखापस्य स्वरुं करोतीत्यादौ यूपस्यावृधिनावरुं करणं नाविधेयं लक्षणाया गौरवान् स्वरुणा पशुमनक्तीति अंजनार्थत्वेन प्राप्तः स्वरुः कुतउपादेय इत्याकांक्षायां यूपस्येति षष्ठ्या तस्य यूपापादानकत्वं गम्यते तथा चाल्पार्थविधाने भवति एवं स्वरुतनः शाखापरिवास्योपवेषकरोतीत्यत्र परिवासन... शाखैव योजिकादिष्टुतीया अवदानात् ॥ न तु स्वरुंदं तु निष्पन्नत्वात् तेन शाखाया आभावे पत्तःकुतश्चित्काष्ठादुपवेषः कर्तव्यः यज्ञतिवा

छित्वा

यूपशब्दः स्वरवादिरत्वादिधर्मलक्षणोन्यर्थः तथा च यूपस्येत्यस्य यूपधर्मसंबंधिनेत्यर्थः

यूपापादानकत्वमिति न चैवं तवापि अदृष्टसंस्कारानिचयत्वप यूपस्यापादानत्वासंभवेन ... स्वरवादेराद
अधिकार ... स्वर्ग ... संबंधसामान्यस्य यूपाश्रयकाष्ठापादानत्व
पर्यवसाने स्वीकारे ... प्रयोगादिति भावः

काष्ठलक्षणा रूपविशेषण

स्वरुः काष्ठशकलम्

अस्य एवतथापि विहितास्यद एवम ... हविःपाशु देश्यवान ... विवत्ता

श्रृद्धयायाः

आग्नेयादयः

18

स्वरुनाशे पुनः खदिरादिछेदना दिनतदुत्पादनं पूर्ववत्से विज्ञानं तु चैन केन ... कलेकासूनाम्

राम

प्रक्षेपमात्रं तत्राप्राप्तं चतुरवत्तसंस्कारार्थं विधीयते यागांश क्रियाशब्दः संबंधापरः
तु आप्राप्तानुवादः

यत्पये तथा प्रदेपरूपा [illegible] धायकः स्यादित्यर्थः
विधीयते [illegible] विजुहोति [illegible]
दर्श [illegible] व्यापियादो याग
उपर्युक्त [illegible] श्रुत्याश

एवं च संप्रति
[illegible]
त्व व्यवहारस्य
नाह यदेत्यादि

दनाद्द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्तदुक्ते अवगाज्जुहोतिरासेचनाधिकः स्यात्तेन यदाग्नेयोष्टाकपाल
इत्यादुम्सतिवाक्येषु यजतेः अवगतोपि यद्द्रव्यदेवतारूपं तेनत्र यजिरस्तीत्यवगते होमस्य पञ्चजुहोतेराघे च
तुरवत्तेजुहोतीति वाक्यात् आसेचनं आधिकं विधीयते ॥१॥ एकस्यतूभयत्वे संयोगपृथक्त्वं अग्निहोत्रे दध्ने
न्द्रियकामस्य जुहुयात् दध्ना जुहोतीति वाक्यद्वयश्रवणविपरीति नक्ष होमाश्रयं भिधोनिराकाक्षन्तयानसं
वध्यते यद्दध्ना जुहुयात् इन्द्रियकामस्येति तेन नित्यार्थं कामार्थं चेति उभयार्थं दधि संयोगपृथक्त्वात् स्वर्ग आ
मुष्मिक एवकारीर्या वृष्टिकामो यजेतेति कारीर्या मुख्यासस्य जीवनकामस्य विहितेः ऐहिकफलेन चित्रया य
जेत पशुकाम इति चित्रादेः फलं खसातिप तिबंधुके ऐहिकमन्यथा मुष्मिकं [illegible] ति सव
[illegible] वाजपेयेन बृहस्पतिस
वनेन यजेतेत्यत्र वाजपेयप्रकरणान्तर्गतत्वेन बृहस्पतिसवस्य कर्मान्तरं विधीयते पौरोहित्यकामस्य यो

विपरीतत्वमिति
वृद्धिसन्निधा
नेत्यर्थः

यागे
४

यः पुरोधःकामः स्यात्स बृहस्पतिसवेन यजेतेति विहितः क्रं=३ मि

भाट्टमाषा॰ ४

19

बृहस्पतिसवस्तस्याचानुपस्थितेस्तत्स्थले [illegible]ला माथं तत्तन्नामकत्वमवज्ञेयं कुंडपायिनामयनस्याग्निहोत्रवत्तज्ज्यो
तिष्टोमप्रकरणे तद्दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति तु कालार्थः संयोगो नत्वंगांगिभावार्थ इज्योतिष्टोम
प्रकरणात्तु वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इत्युपक्रम्य यस्मिन्जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इं
लं जातनगत्तेयं वचनात् नु च शास्त्रफलयोक्तिरीति न्यायाविरोधः मुख्याव मुख्यतायाश्चापि पितुः प्रीतिकरत्वेन तदनु
ग्रहस्यापि लाभात् ॥ ४ ॥ पितृयज्ञः स्वकाल[illegible]त्वादनंगं स्यात्तत्र मावास्यायामपराह्णे पिंड[illegible]पितृयज्ञेन चरं
तीत्यत्रामावास्यापदेन कर्मोपादाय तदंगत्वं पिंडपितृयज्ञस्य [illegible] तत्र च फलकल्पनापि नास्तीति प्राप्ते प्र
कालेश ब्रह्म समुख्यत्वात् अपराह्ण इति कालसामानाधिकरण्याच्च पितृयज्ञः स्वकालविहितो नेष्ट्यंगं ॥ ४ ॥ ॥
इति श्रीभाट्टमाषाप्रकाशे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥ ॥ एवं सिद्धांतानां प्रयोज्यानां क्रमो विचार्यते ॥ अ
ध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति ततः सत्रन एतः पावयेदिति वचनात्तत्र दीक्षित एवाध्वर्युरन्यान्दी

अमावास्यायां ... [illegible]

अनाहिताग्नि कर्तव्यः पिंडपितृयज्ञः ... रामकर्मणि ...

दीक्षितः नदीक्षयेत

ति=२

प्रयोजनं पूर्वपक्षे दर्शविकृतावनुष्ठानं सिद्धांते तु नेति

क्रमस्तु पाठतो लभ्यते पाठप्राप्तानुवादः त्क्वा प्रत्ययः
किमयं पाठप्रमाणकः क्रमः उत श्रुतिप्रमाणकः इति तदर्थं किमिह दीक्षा विधीयते उत क्रम इति संशयः [illegible] दीक्षायाश्चोदक प्राप्तत्वात् क्रम एव विधीयते

सत्रार्थ्यहादि कृत्वाह

क्षयति सत्रेषु तत्र ह्यये यजमाना स्त एव ऋत्विज इति सर्वेषां दीक्षाया आवश्यकत्वात् अध्वर्य्वादि संज्ञा स्वतन्त्र कार्यपत्नी
महात्म्यं च ब्रह्मचारिणाचार्य प्रेषित इति नेद्रसं तमयं श्रौतक्रमः क्त्वा श्रुत्यवगतः ॥ अग्निहोत्रं जुहोति यवागूं पचती
त्यादावर्थ [illegible] क्रमः पाकस्य होमार्थत्वे दृष्टार्थता लाभात् पाठक्रमो नादृियते ॥ होमोत्तरं यवागू पाके
स्यादृष्टार्थतापत्तेः ॥ समिधो यजति तनूनपातं यजतीत्यादौ पाठक्रम एव सप्तदशप्राजापत्यान्पशूनालभत इत्यत्र
पशूनामुपाकरणप्रोक्षणसंज्ञपनादिषु प्रथमः पदार्थोपेत क्रमेणाह्निज्ञसे नैव क्रमेण द्वितीयादयः पदा
र्थाः कर्तव्याः सोयं प्रवृत्तिक्रमः प्रधानस्यांगैः सह न्यूनमधिकं वा विप्रकर्षमहमानस्याप्तुरोधादाश्रीयते ॥
साद्यस्क्रेषु नवनीपस्थाने सह पशूनालभत इत्युक्तं तत्र स्युनिनः स्वस्थानासत्रत्युतौकारणाभावात्प्राधम्यं
अग्नीषोमीयानुबंध्ययोस्तु ततः प्राप्तयोः प्रकृतौ दृष्टंयौ [illegible] विपर्यमसति बाधके नोपनीयमिति द्वितीयो
ग्नीषोमीयस्तृतीयः अनुबंध्य इति नैव क्रमेण तेषां प्रोक्षणादयः त्यस्वतो भवत इति सरस्वती देवतं स

२०

यज्याप्रवृत्तिक्रमे २।१

अएवमुख्याक्रमे हेतुः
मावमतोमुख्यक्रमः

वशात्प्रयाजशे
षेऽनियमे प्राप्ते

षाभिघार

आद्दुमा बा

रस्वदैवतद्विष्टितिचयागद्वयं अन्नं तत्र याज्यानुवाक्यायुगलक्रमे मुख्यात्तेन स्वीदैवत्यस्य पूर्वं निर्वापः पश्चात्सौदै
वत्यस्येति प्रवृत्तिक्रमे सौवैत्तस्मिन्ब्रह्मिसुद्राहरणान्तरं दर्शपूर्णमासयोः प्रथमं दधिधर्माः शाखाहरणादयः स
माम्नाताः पश्चादाग्नेयधर्मा निर्वापादयः याज्यानुवाक्यायुगलक्रमस्तु विपर्ययेण तत्र प्रवृत्तिक्रमसत्वेपि मुख्य
क्रमेणैव नियमः तेन प्रथमं प्रयाजशेषेणाग्नेयस्याभिघारणं पश्चाद्दध्न इत्यादि फलं दर्शपूर्णमासयोरेव
प्रथममग्नीषोमीयस्य ब्राह्मणं पश्चादाग्नेयस्य याज्यानुवाक्या क्रमस्तु विपरीतोऽस्ति तत्रापि सम्प्रैषक्रमेण प्रयो
जनामंत्रा इति तत्पाठक्रम एव बलवान् एवमप्यंगपाठक्रमो बलीयान् न न येस्तावात् तेनाग्नेयाग्नीषोमी
ययोरन्तराले मुख्यक्रमानुरोधान्नाग्नीषोपांशुयाजा यो ऽग्नीषोमीयो पथो पाठमेदभवति स्वतएव प्रा
कृताचक्रमान्तिरकांक्षा पाश्चात्यावेसवमेकादशकपालं निर्वपेत्सरस्वत्याज्यभागाबार्हस्पत्यश्चरुरि
त्यादिविकृतौ न क्रमान्तरकल्पना अग्नीषोमीयपशौ प्रकृतितः हविरासादनान्ते प्राप्ता प्रयाजा ज्ञप्तिष्टं ते पशु

नाम्याभेत
मग्नीषोमी
यमेकादश
कपालं पूर्ण
मासे प्राय
छत

प्रथममाग्नेयस्य विकृतिर्वार्हस्पत्यश्चरुः पश्चादुवि
न उपांशुयाजस्य विकृतिः सारस्वतमाज्यं

आज्यहविष्का।

भावी

पूर्वेद्युर =२

प्रयाजे ... आघारादिभ्यः

प्रयजंतीत्यपकृष्यमाणाः आघारावप्ययपकर्ष इति तेनः पूर्वं तेषामनुष्ठाने क्रमप्रक्रमलोपादिगुण्यं स्यादिति तत्
दंतापकर्षः एवमाग्निमारुतादूर्ध्वमनुयाजैश्चरंतीत्यत्रापि तदाद्युत्कर्षः तत्रापि तदनंतरकर्तव्यस्य तत्तः प्रा
कृतत्वात् प्रक्रमसंगात् ॥ मा वास्यायां ... वेदिं करोतीति अपकृष्यमाणा वेदिः स्वस्मात्पूर्वान् हविर
भिवासनांतानंतापकर्षे तानि वीपादीतां परे त्वस्मादितत्वात्तेन तत्र तन्मात्रापकर्षः मह ... सोनयनी
भ्यामर्धं दिने चरुरसि ... नीयादेवामानुबाह्यायां ... मस्तमितेजुहोतीति
कालस्यानुपादेयत्वेन यावज्जीवमग्निहोत्रं जुहुयादिति जीवनस्य निमित्तविशेषणत्वात् तत्र प्रोष्यमग्नि
होत्रं किंचिदंगमपहायापि कृत्वैव सा तत्पत्नी ... कर्तव्या ॥ ११ ॥ वाजपेये प्राजापत्यानां पशूनामेक
स्योपाकरणादिप्रदानांतं कृत्वा परस्य तथैव कर्तव्यमिति कात्यायनिकः काण्डानुसमये वैश्वदेवीं कृत्वा प्रा
जापत्यैश्चरंतीत्येकका ... लप्रयोगे राबाधात् तमनुउपाकरणादयो ऽपि नेषामेककाला एव प्राप्ताः

हविषः पुरोडाशस्याभिवासनअन्तम् ...

उपादेयं ... होत्रा ... नादि

साङ्गप्रधानानां

प्रकृतौ यो ... तदपि प्रातः ... भिन्नेन ...

काण्डपदार्थसमूहः तमनुपश्चात्समयः पश्चान्तर पदार्थकाण्डस्येत्यर्थः =२

लो३

मा०हृत्स्या पा०५

र्मतोऽप्याकांक्षमेवाक्षिप्तं त इति पदार्थानुसमय एवात्र बोध्यः ॥ यत्राप्यप्रतिग्रहे स्यां शतं सहस्रं वा पुरोडाशा
स्तत्र पदार्थानुसमये सर्वेषामधिश्रयणानि प्रथमस्योद्वासनं चेत् क्रियते तस्य दाह एव स्यादिति ॥ प्रधानबाधात्
हृशास्यन्ते पि कांडानुसमय एव मुष्टिकपालावदानेषु पि कांडानुसमय एव मयाएक स चतुरो मुष्टीन्निरुप्या
परस्य निर्वपेत् । एवमेकस्य सर्वाणि कपालान्युपधाय तदन्यस्योपदध्यात् ॥ एवमेकस्यावदानादि प्रक्षेपान्तं कृ
त्वापरस्य कुर्यादिति ॥ प्रकृते तु एवौ कल्पौ द्रव्यमन्ते स्यात् ॥ नक्षत्रेष्ट्यादौ अग्नये स्वाहा कृत्तिकाभ्यः स्वाहेत्या
द्युपहोमाः प्राकृताज्यावरिष्टानकृत्वैव कर्तव्याः नतु तत्तत्प्रधानानन्तरं प्रधानविधिवाक्यशेषे साय
कृतिवद्धिकृतिः कर्तव्येति शब्देन प्रापिता त्वाकृतास्य स्वादेव वैकृतस्य प्राप्तेः ॥ ४ ॥ प्रकृतौ पञ्च प्रयाजास्त्र
योऽनुयाजाः पशौ तु एकादश प्रयाजा एकादशानुयाजाः तत्रैकादशत्वं प्रयाजादिस्वरूपेऽनर्थ
कं नहि पञ्चत्रयो वा [illegible] कादशी भवितुमर्हतीत्यतस्ते प्रयोगे इयं संख्या [illegible] संपादनीया ॥ नित्त्व

राम

आग्नीषोमीयपशौ

सु

पञ्चप्रजानू द्विरावृत्य पुनश्चरमप्र
याजः सकृदावर्तनीय इति प्रकारेण संख्या
=२

21

[illegible]

तृ मिधेन्य क्रस्च एकादशी दंड मीयमानं तेत्र वदित्यर्थः द्वे त्रे हि मीयंने पुरस्त आमृ ताग्रं दंडं

रुपसदः प्रक्रत्यो विकृतौ तु चस्तासां स्थानवृद्धैवास्ति दंडकलितवदावृत्तौ तु तृतीयाकृ त्या प्रथमायां क्रियमा
णायां कृत प्रक्रमभंगः स्यात् तृतीयके विंशतिमनु कुर्यादिति सान्ति धेनी वृद्धौ त्वत्ते तु बादरायण इति न्यायेन
गंतृ नाम त्ते निवेश इति प्राप्ते पि याधाय्या श द्विता च इ व्यु पाजवत्यौ धाय्ये इत्याख्या तासां द्वयं वे स मि
ध्य मानवती स्वसौ स मिद्धवती यदंत एते धाय्ये इति श्रुतेराल ले नु सुत त्वात्स मिध्य मानुस मिद्धव त्यो रंतराले
निवेशः ॥ अन्यासामपरांत नामं त एव ॥ यत एव त्रै धातवी याम मैत्री ते वा जिने न्य त्त स्मान्ति शुभौ ते निवेशात्
त्रिषु भाप रिदर्घानीतिदर्शनमुपपद्यते ॥ द्वादशसु राजीषु नुनिर्व पतीत्याधानात्त्वमानह विर्याव प्रके
यै पितदं तएवाग्नि होत्रादिप्रवृत्तिः ॥ आधानवत्ता सामम्य स्थैलेन तत्तः प्रागाहवनीयाव स्थितेः ॥ तासा
माधानांगत्व पक्षेपि सांग स्य प्रधानस्यानुष्ठितत्वान्न ततः पूर्वमग्निहोत्रारंभः ॥ काम्यानां नैमित्तिका
नां वा कत्तू नां पाठ क्रमादनुष्ठानं न किं तु कामनावशान्निमित्तवशाच्च तेन क्रमः ॥ ३ ॥ अग्नि नय

या = ५

आगनुल्लेन अनो निवेशा तद्विधानाव तं

आधानोत्तरकालविलम्बेन कर्तव्ये स्थानेपि

पाठो हि न क्रमस्याभिधायकः किंतु अन्यथा प्राप्तस्य क्रमे
कल्पयति श्रुतिस्तु दर्शमरुत्थे साक्षाद्वादे
धत्ते इति ततः प्रबलेति भावः

वक्रममसि

माद्दृभाष्या १

स्तृतीयस्थाने पठ्यमानोऽपि आग्निनोद दर्शसोऽपि ह्युत्तर इति क्रत्ते र्दर्शमेव गच्छेत क्रतिति: पाठस्य दुर्बलत्वात
एव मर्थ्यते पि पाठो दुर्बल इत्यत्र क्तेऽग्निहोत्रं जुहोति यवागूं पचतीत्यत्र एवं प्रवृत्तिक्रमान्मुख्यक्रमो व
लवानित्युक्तं प्रागेव ॥ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति वचनाद्धयाधानं लमाधानं स्वएव य दर्श
दैवेन श्रद्धोपनेमेदयाद धीताथयजेत सोमेनयैव्यमाणो नेतिस्त्र क्षेन्नन सत्रं सोमेन यक्ष्यमाणो गीनाद
धीतेत्यादि वचनेभ्यः सोमनानंतरं यष्यमाण इत्यपि गम्यते ऽतः सोमएव लमपि ॥ आग्नेयो वै ब्राह्मणो दे
वतयास सोमेनेष्ट्वाग्नीषोमीयो भवतिय देवादः पौर्णमासं हविस्तत्तर्ह्यनु निर्वपेत्तर्हि सउभयदेवत्यो भव
तीति वचनादसोमयाजिनो ब्राह्मणस्याग्नीषोमीये हविर्मात्रमुत्कृष्यते ॥ नदर्श पूर्णमासौ भवतएव ॥ प्र
कृतिवद्धि कृतीनां ह्यहकालतानाप्राप्ताय इच्छयसुनासोमेनयजेत सोमावस्यायां पौर्णमास्यां वा यजे
तातिप्रसक्तस्य क्षतिविहितः कालो न चोदनासमकोच महतीति ॥ तेन सर्वांगपुक्ताविकृति ऽपंच दर्शपामे वभवति

इच्छे: = २

२४

राम

यदेवाद इति तन्मात्रोत्कर्षस्यैवाभिधानात् तेन विप्रस्यापि पूर्वाग्नेष्टोमाद्दर्शपूर्णमासौ ३

२२

नासोमयाजी सन्नयेदित्यसोमयाजिनः सान्नाय्याभावात्तद्विकारस्यापि सोमादूर्ध्वमेव। एवमग्नीषोमीयवि
कारस्यापीति ज्ञेयं। सोमविकारस्तु द्व्युत्तमैव न हि तेषां सोमयागादिष्टेः प्राक् चोदनास्ति। प्रकृत्यारंभमंतरेण
विकृतावनधिकारस्योक्तत्वात्॥४॥ पंचमोध्यायः॥५॥ तदेवं विध्यर्थवादमंत्रस्मृतिशिष्टाचारसामर्थ्या
ख्यानि षट् प्रमाणानि धर्मे निरूपितानि प्रथमे॥ द्वितीये शब्दांतराभ्याससंख्यासंज्ञागुणप्रकरणांतरा
ख्यानि षड्धर्मभेदे॥ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याख्यानि षट् शेषशेषिभावे तृतीये तच्छेषि
ताप्रयुक्तिश्चतुर्थे। श्रुत्यर्थपाठप्रवृत्तिस्थानमुख्याख्याः षट् क्रमे पंचमे निरूपिताः॥ अत्रैव निरूपि
